हन-कर्मणि घञ् अप् वा णत्वम्। १अलिन्दे अमरः। २प्रकोष्ठे सि॰कौ॰। अवन्तः ३ताम्रकुम्भे ४लौहमुद्गरे च मेदि॰। मुकुटमतेऽयमणत्वमध्यः।

**प्रघस** पु॰ प्र+अद-अप् घसादेशः। १प्रकृष्टभक्षणे २राक्षसभेदे पु॰ भा॰ व॰ २८४अ॰ ३असुरे ४दैत्ये च त्रिका॰ कुमारानुचरमातृभेदे स्त्री भा॰श॰ ४७अ॰।

**प्रघात** न॰ प्रहन्यतेऽत्र हन-आधारे घञ्। १युद्धे हेमच॰ भावे घञ्। २प्रहनने पु॰।

**प्रघास** पु॰ प्र+घस-कर्मणि घञ्। प्रकर्षेण भक्षणीये हविरादौ वरुणप्रघासश्चातुर्मास्ययागभेदः। प्रघासोऽस्यास्ति भूम्ना इनि। प्रघासिन् मरुत्सु "प्रघासिनोहवामहे मरुतश्च" यजु॰ ३।४४ वेददीपे दृश्यम्।

**प्र(प्रा)घुण** पु॰ प्र(+आ+वा) घुण-क। अतिथौ हेमच॰।

**प्रघूर्ण** पु॰ प्र+घूर्ण-अच्। अतिथौ हेमच॰।

**प्रघोष** पु॰ प्र+घुष--भावे घञ्। १प्रकृष्टघोषणे स्वार्थे कन्। २अव्यक्तशब्दे ध्वनौ जटा॰।

**प्रचक्र** न॰ प्रगतञ्चक्रं प्रा॰ स॰। स्वचक्रात् परचक्रं प्रति चलिते सैन्ये अमरः।

**प्रचक्षस्** पु॰प्र+चक्ष--असि न ख्यादेशः। वृहस्पतौ उणादि॰

**प्रचण्ड** त्रि॰ प्रकर्षेण चण्डः प्रा॰स॰। १दुर्द्धर्षे २दुर्वहे ३दुरन्ते ४प्रतापान्विते च ५श्वेतकरवीरे पु॰मेदि॰ ६दुर्गाया नायिकाभेदे स्त्री "उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका" कालिकापु॰। ७श्वेतदुर्वायां स्त्री राजनि॰।

**प्रचण्डमूर्त्ति** पु॰ प्रचण्डा मूर्त्तिरस्य। १वरुणवृक्षे २भयानकदेहे त्रि॰ शब्दच॰।

**प्रच(चा)य** पु॰ प्र+चि--"हस्तादाने चेरस्तेये" पा॰हस्तादाने अस्तेये घञ् अन्यत्र "एरच्" पा॰ अच्। तत्र अजन्तः यष्ट्यादिना हस्ताग्रस्थानां पुष्पाणां १चयने २समूहे शब्दच॰ ३उपचये ४शिथिलसंयोगभेदे परिमाणशब्दे ७२५॰पृ॰ दृश्यम् "संख्यातः परिमाणाच्च प्रचयादपि जायते। प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते। परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः" भाषा॰ हस्तादाने तु घञ्। हस्तेन पुष्पप्रचाय इत्येव चौर्य्ये तु अच्। प्रचय इत्येव चौर्येण हस्तेन पुष्पादेश्चयने। [धरणिः।

**प्रचर** पु॰ प्र+चर+गोचरप्रचरौ नि॰ आधारेऽप्। मार्गे

**प्रचल** त्रि॰ प्र+चल-अच्। प्रकृष्टचलनयुक्ते चञ्चले।

**प्रचलक** पु॰ प्र+चल+वा वुन्। कीटभेदे सुश्रुतः कीटशब्दे ३०५८पृ॰ दृश्यम्।

**प्रचलाक** पु॰ प्र+चल-बा॰ आकन्। १शराघाते २मयूरशिखण्डे ३भुजङ्गमे पुंस्त्री॰ मेदि॰ स्त्रियां ङीप्।

**प्रचलाकिन्** पु॰ प्रचलाक +मत्वर्थे इनि। मयूरे त्रिका॰।

**प्रचलाय** नामधातुः प्रचल+भृशा॰ अभूततद्भावे क्यङ् आ॰ अक॰सेट्। प्रचलायते अप्रचलायिष्ट प्राचलायिष्ट इत्यन्ये

**प्रचलायित** त्रि॰ प्रचलाय+नामधातुः कर्त्तरि क्त। निद्रादिना घूर्णिते अमरः।

**प्रचायिका** स्त्री प्र+चि+भावे ण्वुच्। १परिपाट्या पुष्पादेश्चयने। प्र+चि-ण्वुल् टाप् कापि अत इत्त्वम्। प्रचयनकर्त्र्यां २स्त्रियां स्त्री।

**प्रचार** पु॰ प्र+चर-भावे घञ्। १प्रसरणे २गतौ ३प्रकाशे च। ततः तारका॰ इतच्। प्रचारित सञ्जातप्रचारे त्रि॰। प्रकाशिते च।

**प्रचाल** पु॰ प्रकृष्टचालः। यूपस्य कटकभेदे। भा॰द्रो॰६१ अ॰।

**प्रचिकीर्षु** त्रि॰प्र+कृ-सन्+उ। प्रतीकारेच्छौ भाग॰४।१९।१९

**प्रचित** त्रि॰ प्र+कर्मणि क्त। १कृतप्रचयने पुष्पादौ स्वार्थे क तत्रार्थे। २प्रचयस्वरयुक्ते त्रि॰। संज्ञायां कन्। दण्डकभेदे "प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः" वृ॰र॰। [सुश्रुतः।

**प्रचीबल** न॰ प्रचेयं बलं यत्र पृषो॰। वीरणे (वेणार मूल)

**प्रचीर** पु॰ वत्सप्रोन्दपस्य १सुनन्दागर्भजाते २पुत्रे नृपभेदे मार्कपु॰ ११८ अ॰। [२वङ्कुले अमरः।

**प्रचुर** त्रि॰ प्र+चुर-क प्रगतश्चुराया वा प्रा॰स॰। १चौरे

**प्रचुरपुरुष** पु॰ प्र+चुर-क नित्यक॰। चौरे त्रिका॰।

**प्रचेतसी** स्त्री प्रकर्षेण चेतयति मूर्च्छितं चित-णिच्-असच् गौरा॰ङीष्। कट्फले राजनि॰ तच्चूर्णस्य हि मूर्च्छानाशकता वैद्यकप्रसिद्धेति तस्यास्तथात्वम्।

**प्रचेतस्** पु॰ प्र+चित-असुन्। १वरुणे अमरः। २मुनिभेदे ३प्रकृष्टहृदये त्रि॰मेदि॰। ४अनुवंश्ये नृपभेदे हरिवं॰ ३२ अ॰। ५प्राचीनवर्हिषः सामुद्रीभार्य्यायां जातेषु पुत्रेषु राजभेदेषु ब॰व॰। हरिवं॰२अ॰। ६प्रकृष्टज्ञानयुक्ते ऋ॰ २।२३।२ भा॰।

**प्रचेट** त्रि॰प्र+चि-तृच्। १प्रचयनकर्त्तरि २सारथौ पु॰हेमच॰

**प्रचेतुन** त्रि॰ प्र+चित-उन। प्रकृष्टज्ञानयुक्ते ऋ॰१।२१।६

**प्रचेल** न॰ प्र+चिल-चेल-वा अच्। पीतकाष्ठे शब्दच॰।

**प्रचेलक** पुंस्त्री॰ प्र+चेल-गतौ ण्वुल्। १घोटके शब्दमा॰। स्त्रियां जातित्वात् ङीष्। २प्रकृष्टगतियुक्ते त्रि॰ स्त्रियां टाप्।